श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्भागवते उद्धवगीतासु

॥ सप्तमोऽध्यायः ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

श्री रङ्गरामानुज महादेशिकन्

His Holiness śrīmad āṇḍavan śrīraṅgam

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

॥ सप्तमोऽध्यायः ॥

श्रीभगवानुवाच
न रोधयति मां योगो न साङ्ख्यं धर्म एव च।
न स्वाध्यायस्तपस्त्यागो नेष्टापूर्तं न दक्षिणा॥ 7.1 ॥

व्रतानि यज्ञश्छन्दांसि तीर्थानि नियमा यमाः।
यथावरुन्धे सत्सङ्गः सर्वसङ्गापहो हि माम्॥ 7.2 ॥

सत्सङ्गेन हि दैतेया यातुधाना मृगाः खगाः।
गन्धर्वाप्सरसो नागाः सिद्धाश्चारणगुह्यकाः॥ 7.3 ॥

विद्याधरा मनुष्येषु वैश्याः शूद्राः स्त्रियोऽन्त्यजाः।
रजस्तमःप्रकृतयस्तस्मिंस्तस्मिन् युगेऽनघ॥ 7.4 ॥

बहवो मत्पदं प्राप्तास्त्वाष्ट्रकायाधवादयः।
वृषपर्वा बलिर्बाणो मयश्चाथ विभीषणः॥ 7.5 ॥

सुग्रीवो हनुमानृक्षो गजो गृध्रो वणिक्पथः।
व्याधः कुब्जा व्रजे गोप्यो यज्ञपत्न्यस्तथापरे॥ 7.6 ॥

ते नाधीतश्रुतिगणा नोपासितमहत्तमाः।
अव्रतातप्ततपसः मत्सङ्गान्मामुपागताः॥ 7.7 ॥

केवलेन हि भावेन गोप्यो गावो नगा मृगाः।
येऽन्ये मूढधियो नागाः सिद्धा मामीयुरञ्जसा॥ 7.8 ॥

यं न योगेन साङ्ख्येन दानव्रततपोऽध्वरैः।
व्याख्यास्वाध्यायसंन्यासैः प्राप्नुयाद् यत्नवानपि॥ **7.9**॥

रामेण सार्धं मथुरां प्रणीते
श्वाफल्किना मय्यनुरक्तचित्ताः।
विगाढभावेन न मे वियोग -
तीव्राधयोऽन्यं ददृशुः सुखाय॥ **7.10**॥

तास्ताः क्षपाः प्रेष्ठतमेन नीता
मयैव वृन्दावनगोचरेण।
क्षणार्धवत्ताः पुनरङ्ग तासां
हीना मया कल्पसमा बभूवुः॥ **7.11**॥

ता नाविदन् मय्यनुषङ्गबद्ध -
धियः स्वमात्मानमदस्तथेदम्।
यथा समाधौ मुनयोऽब्धितोये
नद्यः प्रविष्टा इव नामरूपे॥ **7.12**॥

मत्कामा रमणं जारमस्वरूपविदोऽबलाः।
ब्रह्म मां परमं प्रापुः सङ्गाच्छतसहस्रशः॥ **7.13**॥

तस्मात्त्वमुद्धवोत्सृज्य चोदनां प्रतिचोदनाम्।
प्रवृत्तिं च निवृत्तिं च श्रोतव्यं श्रुतमेव च॥ **7.14**॥

मामेकमेव शरणमात्मानं सर्वदेहिनाम्।
याहि सर्वात्मभावेन मया स्या ह्यकुतोभयः॥ **7.15**॥

श्रीउद्धव उवाच
संशयः शृण्वतो वाचं तव योगेश्वरेश्वर।
न निवर्तत आत्मस्थो येन भ्राम्यति मे मनः॥ **7.16**॥

श्रीभगवानुवाच
स एष जीवो विवरप्रसूतिः
    प्राणेन घोषेण गुहां प्रविष्टः।
मनोमयं सूक्ष्ममुपेत्य रूपं
    मात्रा स्वरो वर्ण इति स्थविष्ठः॥ **7.17**॥

यथानलः खेऽनिलबन्धुरूष्मा
    बलेन दारुण्यधिमथ्यमानः।
अणुः प्रजातो हविषा समिध्यते
    तथैव मे व्यक्तिरियं हि वाणी॥ **7.18**॥

एवं गदिः कर्म गतिर्विसर्गो
    घ्राणो रसो दृक् स्पर्शः श्रुतिश्च।
सङ्कल्पविज्ञानमथाभिमानः
    सूत्रं रजःसत्त्वतमोविकारः॥ **7.19**॥

अयं हि जीवस्त्रिवृदब्जयोनि -
    रव्यक्त एको वयसा स आद्यः।
विश्लिष्टशक्तिर्बहुधेव भाति
    बीजानि योनिं प्रतिपद्य यद्वत्॥ **7.20**॥

यस्मिन्निदं प्रोतमशेषमोतं
    पटो यथा तन्तुवितानसंस्थः।
य एष संसारतरुः पुराणः
    कर्मात्मकः पुष्पफले प्रसूते॥ **7.21**॥

द्वे अस्य बीजे शतमूलस्त्रिनालः
    पञ्चस्कन्धः पञ्चरसप्रसूतिः।

दशैकशाखो द्विसुपर्णनीड -
स्त्रिवल्कलो द्विफलोऽर्कं प्रविष्टः ॥ **7.22** ॥

अदन्ति चैकं फलमस्य गृध्रा
ग्रामेचरा एकमरण्यवासाः।
हंसा य एकं बहुरूपमिज्यै -
र्मायामयं वेद स वेद वेदम् ॥ **7.23** ॥

एवं गुरूपासनयैकभक्त्या
विद्याकुठारेण शितेन धीरः।
विवृश्च्य जीवाशयमप्रमत्तः
सम्पद्य चात्मानमथ त्यजास्त्रम् ॥ **7.24** ॥

॥ इति उद्धवगीतासु सप्तमोऽध्यायः समाप्तः ॥